धातुर्गतिर्विचित्रा च दुर्ज्ञेया भुवनत्रये ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
अपि च ।
भगवन्दन उवाच ।
"सम्बन्धो हि विधिवशो न मे साध्यो प्रजाधिप ।
प्रजापतिर्योगकर्त्ता जन्मदाताहमेव च ॥
का कस्य पत्नी कन्या वा वरः को वा सबान्धवः ॥
कर्म्मानुरूपफलदः सर्व्वेषां कारणं विधिः ।
भवितव्यं कृतं कर्म्म तदमोघं श्रुतौ श्रुतम् ॥
अन्यथा निष्फलं सर्व्वमनीशस्योद्यमो यथा ।
वृषभानुप्रिया धात्रा लिखिता चेत् सुता मम ॥
पुरा भूतेव को वाहं केनान्येन निवार्य्यते ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अः ॥*॥
अन्यच्च ।
"त्यागे दोषः कामुकीनां शापभाक् पापभाक् गृही ।
ब्रह्मा जगद्विधातापि न विरक्तः कलत्रवान् ।
त्यागे दोषस्तु कदाचिन्नास्माकं त्यक्तयोषि-
ताम् ॥"*॥
अपरञ्च ।
"स्वान्तर्दुःखेन दुःखार्त्तो यो यं शपति निश्चितम् ।
तं शापं खण्डितुं शक्तो न विधाता जगत्-
प्रभुः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अः ॥*॥
असौ जगतां पतिर्यथा,—
"द्वौ धाता च विधाता च पौराणौ जगतां
पती ।
द्वौ प्राकारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकी-
र्त्तितौ ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(त्रि, मेधावी । इति निघण्टुः । ३ । १५ ॥
विहितकर्म्मानुष्ठाता । यथा, मनुः ।११।३५।
"विधाता शासिता वक्ता मैत्री ब्राह्मण उच्यते ।
तस्मै नाकुशलं ब्रूयात् न शुष्कां गिरमीरयेत् ॥"
स्रष्टा । सर्व्वसमर्थः । यथा, रघुः । १ । ७० ।
"तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमपादपम् ॥"
जनयिता । दाता । यथा, कुमारे । १ । ५७ ।
"स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥")
विधातृभूः, पुं, (विधातुर्ब्रह्मणो भूरुत्पत्तिर्यस्य ।)
नारदमुनिः । इति त्रिकाण्डशेषः ॥
विधात्रायुः, [स्] पुं, (विधातुरायुर्जीवित-
कालपरिमाणं यस्मात् । सूर्य्यक्रियां विना वत्स-
रादिज्ञानासम्भवादेवास्य तथात्वम् ।) सूर्य्यः ।
यथा,—
"वैश्वदानो विधात्रायुर्द्दिंयवस्रो हिवाकरः ॥"
इति शब्दचन्द्रिका ॥
क्ली, ब्रह्मणो वयः । तद्यथा । चतुर्द्दश-
मन्वन्तरैर्ब्रह्मणः एकं दिनं भवति । तन्मनुष्य-
मानेनैकः कल्पस्त्रिंशत्कल्पे ब्रह्मण एको
मासो भवति । एतादृशैर्द्वादशमासैर्ब्रह्मणः
संवत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः ।
तत्र पञ्चाशत् वर्षा यतीताः । एकपञ्चाशद्वा-
रम्भेऽधुना श्वेतवाराहकल्पः । अत्र मन्वन्त-
राणि यतीतानि षट् अधुना वैवस्वतमन्वन्तरं
वर्त्तते । इति श्रीभागवतमतम् ॥
विधात्री, स्त्री, (वि + धा + तृच् । ङीप् ।) पिप्पली ।
इति शब्दचन्द्रिका ॥ विधानकर्त्री । यथा,—
"गतासूनां बाहुप्रकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शववहृदि महाकालसुरत-
प्रयुक्तां त्वां ध्यायन् जननि जड़चेता अपि
कविः ॥"
इति तन्त्रसारे कर्पूरादिस्तोत्रम् ॥
विधानं, क्ली, (वि + धा + ल्युट् ।) विधिः । इति
जटाधरः ॥ (यथा, मनुः । ७ । १८१ ।
"यदातु यानमातिष्ठेत् परराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥")
करणम् । इति नानार्थविधिशब्दटीकायां
भरतः ॥ (यथा, रघुः । ७ । १४ ।
"परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥")
करिकवलः । इति हारावली ।१६१ ॥ (वेदादि-
शास्त्रम् । यथा, मनुः । १ । ३ ।
"त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः ।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो ! ॥"
नाटकाङ्गविशेषः । यथा, साहित्यदर्पणे । ६ ।
३४६ ।
"सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम् ॥"
यथा, बालचरिते ।
"उत्साहातिशयं वत्स तव बाल्यञ्च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥")
विधानकं, क्ली, व्यथा । इति शब्दरत्नावली ॥
(विधिः । यथा, कथासरित्सागरे ।४६।१८० ।
"ततस्तुष्टो भदन्तोऽसौ तस्मायादित्यशर्म्मणे ।
ददौ सुलोचनामन्त्रमर्थितं सविधानकम् ॥")
विधानवेत्तरि, त्रि ॥
विधानगः, पुं, (विधानं गायतीति । गै + टक् ।)
पण्डितः । इति शब्दरत्नावली ॥
विधायकः, त्रि, विपूर्व्वधाञ्धातोर्णक(ण्वुल्)प्रत्य-
येन निष्पन्नः ॥ विधानकर्त्ता । (यथा, राज-
तरङ्गिण्याम् । १ । १६६ ।
"स विहारस्य निर्म्माता शुष्को शुष्कपुरस्य यः ।
जयस्वामिपुरस्यापि शुद्धधीः स विधायकः ॥")
विधिज्ञापकः ॥
विधायी, [न्] त्रि, विधानकर्त्ता । विपूर्व्वकधाञ्-
धातोर्णिन्प्रत्ययेन निष्पन्नः ॥ (यथा, कथा-
सरित्सागरे । ४२ । ११३ ।
"भार्य्याञ्च कायालङ्कारां तादृक्कार्य्यविधा-
यिनीम् ।
भूगृहे स निचिक्षेप पापां तां पुत्त्रघातिनीम् ॥")
विधार्य्यं, क्ली, कम्पनम् । विपूर्व्वधृधातोर्ण्यण्प्रत्ययेन
निष्पन्नम् ॥
विधिः, पुं, (विधति विदधाति विश्वमिति । विध
विधाने + "इगुपधात् कित् ।" उणा० ४।११६ ।
इति इन् । स च कित् ।) ब्रह्मा । (यथा,
नैषधे । २२ । ४७ ।
"विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥"*॥
विधीयेते सुखदुःखे अनेनेति । वि + धा +
"उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः ।)
भाग्यम् । (यथा, मार्कण्डेये । ८ । १८२ ।
"राज्यनाशं सुहृत्त्यागो भार्य्यातनयविक्रयः ।
हरिश्चन्द्रस्य राजर्षेः किं विधे ! न कृतं त्वया ॥")
क्रमः । विधानम् । इत्यमरः ॥ कालः । इति
मेदिनी । धे, १७ ॥ विधिवाक्यम् । (यथा,
गीतायाम् । १६ । २३ ।
"यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥")
प्रकारः । नियोगः । इति हेमचन्द्रः ॥ विष्णुः ।
इति हलायुधः । कर्म्म । इति त्रिकाण्डशेषः ॥
(यथा, देवीपुराणे ।
"तस्मात् सूर्य्यः शशाङ्कस्य च्यवृद्धिविधेर्विभुः ॥")
गजान्नम् । इति जटाधरः ॥ वैद्यः । इति
राजनिर्घण्टः ॥ यागोपदेशकग्रन्थः । इति
भरतधृतकोषः ॥ षड्विधसूत्रलक्षणान्तर्गत-
लक्षणविशेषः । यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"
अप्राप्तप्रापको विधिः । स तु द्विविधः । वर्णोत्-
पादनरूपोऽभावरूपश्च । वर्णोत्पादनरूपो यथा
सहर्गे घं इत्यादि । अभावरूपो द्विविधः ।
नाशो निषेधरूपश्च । नाशविधिर्यथा । लोपो-
ऽस्योमाडोरित्यादि । निषेधविधिर्यथा । नाभ्यो-
ऽन्त इत्यादि । सामान्यप्राप्तस्य विशेषावधारणं
नियमविधिः । यथा । रङो विः सुपि इत्यादि ।
अन्यधर्म्मस्यान्यत्रारोपणमतिदेशविधिः यथा ।
इन्वदिक् इत्यादि । पूर्व्वसूत्रस्थितपदस्य पर-
सूत्रेषूपस्थितिरधिकारविधिः । स तु त्रिविधः ।
"सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च ।
गङ्गास्रोत इति ख्यातस्त्वधिकारास्त्रयो मताः ॥"
सिंहावलोकितो यथा । वावगोर्हान्ते इत्यस्मात
हान्ते इति पदस्य ऋक्यगित्यन्तेषूपस्थितिः ।
मण्डूकप्लुतिर्यथा । टाभिसङेङसीत्यस्मात् अत
इति पदस्य आत्तिमभवि इत्यत्रोपस्थितिः ।
गङ्गास्रोतो यथा । वेः स्वि औ जस् इत्यस्मात्
वेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिरिति ।
एवञ्च ।
"कार्य्यी कार्य्यं निमित्तञ्च त्रिभिः सूत्रसदा-
वृतम् ।
कदाचित् कार्य्यिकार्य्याभ्यां क्वचित् कार्य्यनिमि-
त्ततः ॥
यस्य निर्द्दिश्यते कार्य्यं स कार्य्यी गदितो बुधैः ।